लोमशसंहितास्थितः

भावफलाध्यायः

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई.

॥ श्रीः ॥

लोमशसंहितास्थितः

भावफलाध्यायः

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई.

संस्करण : जनवरी २००५, सम्वत् : २०६१

मूल्य : ५ रुपये मात्र ।

मुद्रक एवं प्रकाशक:
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

Printers & Publishers
Khemraj Shrikrishnadass
Prop: Shri Venkateshwar Press
Khemraj Shrikrishnadass Marg,
7th Khetwadi, Mumbai - 400 004.
Web Site : http://www.khe-shri.com
E-mail : khemraj@vsnl.com
Printed by Sanjay Bajaj for M/s Khemraj Shrikrishnadass,
Prop. Shri Venkateshwar Press, Mumbai-400 004, at their
Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune -411 013.

भूमिका

जो कि इसमें राश्यधिप ग्रह करके द्वादशभाव का फल कहा जाता है और सम्पूर्ण आयु भर का सुख-दुःख, हानि, लाभ, स्त्री, पुत्र के फल कहने में बडा उपयोगी है, विस्तार थोडा पर फल ज्यादा है, इसको पण्डित दुलारे तिवारी आचार्य वरहटा ग्राम के ने प्राचीन पुस्तकों से संशोधित कर बडे परिश्रम से विस्तृत की और इस पुस्तक को श्रीमहाराज कुमार श्रीलालसाहिबा उर्फ शिवराजसिंहजी रहीस मौजा वरहटा जिला वा तहसील नरसिंहपुर ने सेठ गंगाविष्णु श्रीकृष्णदासजी को छापने के सर्वाधिकार दिया।

श्रीमहाराज कुमार श्रीलालसाहिबा उर्फ
शिवराजसिंहजी रहीस

श्रीगणेशाय नमः ।

अथ

लोमशसंहितास्थित:

भावफलाध्यायः

लग्नेशे लग्नगे पुंसः स्वदेहः स्वभुजाक्रमी ॥
मनस्वी चातिचांचल्यो द्विभार्यापरिगामि वा ॥१॥
लग्नेशे द्वितिये लाभे स लाभी पण्डितो नरः ॥
सुशीलो धर्मविन्मानी बहुदारगणैर्युतः ॥२॥
लग्नेशे तृतिये षष्ठे सिंहतुल्यपराक्रमी ॥
सर्वसम्पद्युतो मानी द्विभार्यो मतिमान् सुखी ॥३॥
लग्नेशे दशमे तुर्ये पितृमातृसुखान्वितः ॥
बहुभ्रातृयुतः कामी गुणसौंदर्यसंयुतः ॥४॥
लग्नेशे पञ्चमे मानी सुतैः सौख्यं च मध्यमम् ॥
प्रथमापत्यनाशः स्यात्क्रोधी राजप्रवेशिकः ॥५॥

लग्नेशः सप्तमे यस्य भार्या तस्य न जीवति ॥
विरक्तो वा प्रवासी च दरिद्रो वा नृपोऽपि वा ॥६॥
लग्नेशे व्ययगे चाष्टे शिल्पविद्याविशारदः ॥
द्यूती चौरो महाक्रोधी परभार्यातिभोगकृत् ॥७॥
लग्नेशे नवमे पुंसां भाग्यवान् गजवल्लभः ॥
विष्णुभक्तो पटुर्वाग्मी पुत्रदारधनैर्युतः ॥८॥
धनेशे धनगे पुंसो धनवान् गर्भसंयुतः ॥
भार्याद्वयं त्रयं चापि सुतहीनोऽपि जायते ॥९॥
धनेशे तृतिये तुर्ये विक्रमी मतिमान्गुणी ॥
परदाराभिगामी च निश्चलो देवभक्तियुक् ॥१०॥
धनेशे रिपुगे शत्रौ धनप्राप्तिर्भवेद्ध्रुवम् ॥
शत्रुतो नाशवित्तस्य गुदे चौरो भवेद्रुजा ॥११॥
धनेशे सप्तमे वैद्यः परजायाभिगामिनः ॥
जाया तस्य भवेद्वेश्या मातापि व्यभिचारिणी ॥१२॥
धनेशे मृत्युगेहस्थे भूमिद्रव्यं लभेद्ध्रुवम् ॥
जायासौख्यं भवेदल्पं ज्येष्ठभ्रातृसुखं न हि ॥१३॥

धनेशे नवमे लाभे धनवान् धार्मिकः पटुः ॥
बाल्ये रोगी सुखी पश्चात् यावदायुः समाप्यते ॥१४॥
धनेशो दशमे यस्य कामिनी चात्र पण्डितः ॥
बहुदारधनैर्युक्तो सुतहीनोऽपि जायते ॥१५॥
धनेशे व्ययगे मानी साहसी धनवर्जितः ॥
विक्रमी नृपमेधावी ज्येष्ठपुत्रसुखं न हि ॥१६॥
धनेशे च तनौ पुत्रः स्वकुटुम्बस्य कारकः ॥
धनवान् निष्ठुरः कामी परकार्येषु तत्परः ॥१७॥
तृतीयेशे तृतीयस्थे विक्रमी भृत्यसंयुतः ॥
धनयुक्तो महाहृष्टो भुनक्ति सुखमद्भुतम् ॥१८॥
तृतीयेशे सुखे कर्मे पञ्चमे वा सुखं सदा ॥
अतिक्रूरा भवेद्भार्या धनाढ्यो मतिमान्प्रति ॥१९॥
तृतीयेशे रिपौ यस्य भ्राता शत्रुर्महाधनी ॥
मातुलानां सुखं न स्यान्मातुल्यां भोगमिच्छति ॥२०॥
तृतीयेशे व्ययेभाग्ये स्त्रीभिर्भाग्योदयो भवेत् ॥
पिता तस्य महाचौरो सुसेवी दुःखदा सती ॥२१॥

तृतीयेशेऽष्टमे द्यूने राजद्वारे मृतिर्भवेत् ॥
चौरो वा परगामी वा बाल्ये कष्टं दिने दिने ॥२२॥
तृतीयेशे तनौ लाभे स्वभुजार्जितवित्तवान् ॥
सुखी कृशो महाक्रोधी साहसी जनसेवकः ॥२३॥
गुदाभंजनिक स्थूलो परभार्याधने रुचिः ॥
स्वल्पारंभी सुखी न स्यात् तृतीयेशे धने गते ॥२४॥
तुर्येशे तुर्यगे मन्त्री भवेत्सर्वजनाधिपः ॥
चतुरः शीलवान् मानी धनाढ्यो स्त्रीप्रियः सुखी ॥२५॥
तुर्येशे पञ्चमे भागे सुखी सर्वजनप्रियः ॥
विष्णुभक्तिरतो मानी स्वभुजार्तिविनाशकृत् ॥२६॥
सुखेशे शत्रुगेहस्थे तदा स्याद्बहुमातृकः ॥
क्रोधी वैरी व्यभीचारी दुष्टचित्तो मनस्व्यपि ॥२७॥
सुखेशे सप्तमे लग्ने बहुविद्यासमन्वितः ॥
पित्रार्जितधनत्यागी सभायां मूकवद्भवेत् ॥२८॥
सुखेशो दशमे यस्य मातृसौख्येन संयुतः ॥
धनधान्यसमायुक्तो धर्मे प्रीतिश्च जायते ॥२९॥

सुखेशे व्ययरन्ध्रेस्थे सुखहीनो भवेन्नरः ॥
पितृसौख्यं भवेदल्पं दीर्घायुर्जायते ध्रुवम् ॥३०॥
सुखेशे तृतिये लाभे नित्यं रोगी धनी भवेत् ॥
उदारो गुणवान् दाता स्वभुजार्जितवित्तवान् ॥३१॥
सर्वसंपद्युतो मानी साहसी कुसुखान्वितः ॥
कुटुंबैः संयुतो भोगी सुखेशे च द्वितीयगे ॥३२॥
सुतेशः पञ्चमे यस्य तस्य पुत्रो न जीवति ॥
क्षणिकः क्रूरभाषी च धार्मिको मतिमान् भवेत् ॥३३॥
सुतेशे षष्ठरिः फस्थे पुत्रः शत्रुत्वमाप्नुयात् ॥
मृत्युतो ग्राह्यपुत्रो वा धनपुत्रोऽथ वा भवेत् ॥३४॥
सुतेशे कामगे मानी सत्यधर्मसमन्वितः ॥
तुङ्गषष्ठे तनुस्वामी भक्तियुक्तैकतेजसा ॥३५॥
सुतेशे चायुषि वित्ते बहुमैत्रो न संशयः ॥
उदरव्याधिसंयुक्तो क्रोधयुक्तो धनान्वितः ॥३६॥
सुतेशे नवमे कर्मे पुत्रो भूपसमो भवेत् ॥
अथवा ग्रन्थकर्ता च विख्यातो कुलदीपकः ॥३७॥

सुतेशे लाभभवने पण्डितो जनवल्लभः ॥
ग्रन्थकर्ता महादक्षो बहुपुत्रो धनान्वितः ॥३८॥
सुतेशे लग्नसहजे मायावी पिशुनो महान् ॥
दोषोऽपि दत्तवन्नैव कश्चिद्द्रव्यस्य का कथा ॥३९॥
सुतेशे मातृभवने चिरं मातृसुखं भवेत् ॥
लक्ष्मीयुक्तो सुबुद्धिश्च सचिवश्चागुरुस्तथा ॥४०॥
षष्ठेशे रिपुभावस्थे स्वज्ञाती शत्रुवद्भवेत् ॥
परज्ञातिर्भवेन्मित्रं भूमौ न चलति ध्रुवम् ॥४१॥
षष्ठेशे सप्तमे लाभे लग्ने वा पशुमान् भवेत् ॥
धनवान् गुणवान् मानी साहसी पुत्रवर्जितः ॥४२॥
षष्ठेशेऽष्टमरिःफस्थे रोगी शत्रुर्मनीषिणाम् ॥
परजायाभिगामी च जीवहिंसासु तत्परः ॥४३॥
षष्ठेशो नवमे यस्य काष्ठपाषाणविक्रयी ॥
व्यन्त्रहारे क्वचिद्धानिः क्वचिद्वृद्धिर्भवेत्किल ॥४४॥
षष्ठेशे कर्मवित्तस्थे साहसी कुलविश्रुतः ॥
परदेशी शुचिर्वक्ता स्वधर्मेष्वेकनिष्ठकः ॥४५॥

षष्ठेशो तृतिये तुर्ये क्रोधेनारक्तलोचनः ॥
मनस्वी पिशुनोऽधर्मी चलचित्तोऽतिवित्तवान् ॥४६॥
षष्ठेशः पञ्चमे यस्य चले मित्रधनादिकम् ॥
कफयुक्तः सुखी सौम्यःस्वकार्ये चतुरो महान् ॥४७॥
सप्तमेशे तनौ चास्ते परजायासु लंपटः ॥
निष्ठुरो वचसा धीरो वार्ता न स्थीयते हृदि ॥४८॥
जायशे चाष्टमे षष्ठे सरोषा कामिनी भवेत् ॥
क्रोधयुक्तो भवेद्वापि न सुखं लभते क्वचित् ॥४९॥
द्यूनेशे नवमे वित्ते नानास्त्रीभिः समागमः ॥
आरंभी दीर्घसूत्री च स्त्रीषु चित्तं हि केवलम् ॥५०॥
द्यूनेशे दशमे तुर्ये तस्य जाया पतिव्रता ॥
धर्मात्मा तस्य संयुक्तः केवलं वातरोगवान् ॥५१॥
द्यूनेशे सहजे लाभे मृतपुत्रोऽपि जायते ॥
कदाचिज्जीवति कन्या पश्चात्पुत्रोऽपि जीवति ॥५२॥
द्वादशे सप्तमेशे तु दरिद्रः कृपणो महान् ॥
चौरं कन्या भवेद्धार्या वस्त्राजीवी च नीचधीः ॥५३॥

सर्वैर्गुणैर्युतो मानी भवेत्सर्वगुणाधिपः ॥
सदैव हर्षसंयुक्तः सप्तमेशे सुतस्थिते ॥५४॥
द्यूतश्चौरोऽन्यथावादी गुप्तनिंदासु तत्परः ॥
अष्टमेशेऽष्टमस्थाने भार्या पररता भवेत् ॥५५॥
अष्टमेशे तपस्थाने महापापी च नास्तिकः ॥
सुताढ्या त्वथवा वन्ध्या परभार्याधने हृदि ॥५६॥
अष्टमेशे सुखे कर्मे पिशुनो बन्धुवर्जितः ॥
मातापित्रोर्भवेन्मृत्युः स्वल्पकालेन भीतियुक् ॥५७॥
अष्टमे सप्तमे लाभे कृते वृद्धिः प्रजायते ॥
द्रव्यं न स्थीयते गेहे स्थिरवृद्धिर्भवेच्च न ॥५८॥
अष्टमेशे व्यये षष्ठे नित्यरोगी प्रजायते ॥
जलसर्पादिकाद्धातोभवेत्तस्यैव शैशवे ॥५९॥
अष्टमेशे तनौ कामे भार्याद्वयं समादिशेत् ॥
विष्णुद्रोहरतो नित्यं व्रणे रोगः प्रजायते ॥६०॥
अष्टमेशे धने राहौ बलहीनः प्रजायते ॥
धनं तस्य भवेत्स्वल्पं गतं वित्तं न लभ्यते ॥६१॥

धनधान्ययुतो नित्यं गुणसौन्दर्यसंयुतः ॥
बहुभ्रातृसुखैर्युक्तो भाग्येशे नवमे स्थिते ॥६२॥
भाग्येशे दशमे तुर्ये मन्त्री सेनापतिर्भवेत् ॥
पुण्यवान्पशुवांश्चापि साहसी क्रोधवर्जितः ॥६३॥
भाग्येशे पञ्चमे लाभे भाग्यवान् जनवल्लभः ॥
गुरुभक्तिरतो मानी धीरोदारगुणैर्युतः ॥६४॥
भाग्येशे मातुले रिःफे भाग्यहीनो भवेद्ध्रुवम् ॥
मातुलस्य सुखं न स्यात् ज्येष्ठभ्रातुः सुखं तथा ॥६५॥
भाग्येशे सप्तमे कल्पे गुणवान्पशुमान् भवेत् ॥
कदाचिन्न भवेत्सिद्धिर्यत्कार्यं कर्तुमिच्छति ॥६६॥
भाग्येशे सहजे वित्ते सदा भाग्यानुचिंतकः ॥
धनवान्गुणवान् कामी पण्डितो जनवल्लभः ॥६७॥
दशमेशे सुखे मर्मे ज्ञानवान्सहविक्रमी ॥
गुह्यदेवार्चनरतो धर्मात्मा सत्यसंयुतः ॥६८॥
कर्मेशश्चाष्टमे यस्य चिन्तायुक्तो भवेन्नरः ॥
धनादिसुखमध्यं स्यात् शरीरे कष्टसंयुतः ॥६९॥

दशमेशे सुते लाभे धनवान् पुत्रवान् भवेत् ॥
सर्वदा हर्षसंयुक्तः सत्यवादी सुखी नरः ॥७०॥
कर्मेशस्तनये यस्य धर्मकर्मसु तत्परः ॥
देवद्विजेषु भक्तिश्च तीर्थयोगेषु तत्परः ॥७१॥
कर्मेशश्च व्यये यस्य शत्रुभिः पीडितः सदा ॥
चातुर्यगुणसंपन्नः कदाचिन्न सुखी भवेत् ॥७२॥
दशमाधिपतौ लग्ने कविितागुणसंयुतः ॥
बाल्ये रोगी सुखी पश्चादर्थवृद्धिर्दिने दिने ॥७३॥
धने मदे च सहजे कर्मेशो यदि संस्थितः ॥
मनस्वी गुणवान् वाग्मी सत्यधर्मसमन्वितः ॥७४॥
लाभेशे संस्थिते लाभे स वाग्मी जायते ध्रुवम् ॥
पाण्डित्यं कविता चैव वर्द्धते च दिने दिने ॥७५॥
प्राप्तिस्थानाधिपे रिःफे म्लेच्छसंसर्गकारकः ॥
कामुको बहुकान्तश्च क्षणिकः कामलंपटः ॥७६॥
लाभेशे संस्थिते लग्ने धनवान्सात्विको महान् ॥
समदृष्टिर्महावक्ता कौतुकी च भवेत्सदा ॥७७॥

लाभेशे द्वितिये पुत्रे नानासुखसमन्वितः ॥
पुत्रवान् धार्मिकश्चैव सर्वसिद्धिप्रदायकः ॥७८॥
लाभेशे सहजे वित्ते तीर्थेषु तत्परो भवेत् ॥
कुशलः सर्वकार्येषु केवलं शूलरोगवान् ॥७९॥
लाभेशे षष्ठभवने नानारोगसमन्वितः ॥
सर्व सुखं भवेत्तस्य प्रवासी परसेवकः ॥८०॥
लाभेशे सप्तमे रन्ध्रे भार्या तस्य स्वरूपवान् ॥
उदारो धनवान्कामी भूसरो भवति ध्रुवम् ॥८१॥
लाभेशे गगने धर्मे राजपुत्रधनाधिपः ॥
चतुरः सत्यवादी च निजधर्मसमन्वितः ॥८२॥
व्ययेशेऽरिव्यये पापी मातृमृत्युविचिंतकः ॥
क्रोधी सन्तानदुःखी च परजायासु लंपटः ॥८३॥
व्ययेशे मदने लग्ने जायासौख्यं भवेन्न हि ॥
दुर्बलो कफरोगी च धनविद्याविशारदः ॥८४॥
व्ययेशे द्वितिये रन्ध्रे विष्णुभक्तिसमन्वितः ॥
धार्मिकः प्रियवादी च गुणैस्सवैंस्समन्वितः ॥८५॥

भ्रातुद्वेषी प्रियद्वेषी गुरुद्वेषी भवेन्नरः ॥
व्ययेशे सहजे धर्मे स्वशरीरस्य पोषकः ॥८६॥
व्ययेशे दशमे लाभे पुत्रसौख्यं भवेन्न हि ॥
मणिमाणिक्यमुक्ताभिर्धनं किञ्चित्समालभेत् ॥८७॥

इति श्रीलोमशसंहितायां भावफलाध्यायः समाप्तः ॥

हमारे प्रकाशनों की अधिक जानकारी व
खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर, मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास

६६, हडपसर इण्डस्ट्रियल इस्टेट,पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५, फैक्स -०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,

लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डिंग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष - ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास

चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८.

KHEMRAJ SHRIKRISHNADASS